# Shri Minakshi Shatakam or Stavarajam

# શ્રીમીનાક્ષીશતકમ્ અથવા મીનાક્ષીસ્તવરાજમ્

## Document Information

Text title : Minakshishatakam or Minakshistavarajam

File name : mInAkShIshatakam.itx

Category : devii, devI, shataka, stavarAja, mInAkShI

Location : doc_devii

Author : sachchidAnandabhAratI (not sure if same as sachchidAnandashivAbhinavanRisiMhabhAratI)

Transliterated by : Aaditya Kalyanaraman

Proofread by : Aaditya Kalyanaraman, Rajani Arjun Shankar

Latest update : July 30, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 2, 2025

*sanskritdocuments.org*

# શ્રીમીનાક્ષીશતકમ્ અથવા મીનાક્ષીસ્તવરાજમ્

શ્રીમીનાક્ષીધ્યાનમ્ ।
શબ્દબ્રહ્મમયી ચરાચરમયી જ્યોતિર્મયી વાઙ્મયી
નિત્યાનન્દમયી નિરઞ્જનમયી તત્ત્વમયી ચિન્મયી ।
તત્ત્વાતીતમયી પરાત્પરમયી માયામયી શ્રીમયી
સર્વૈશ્વર્યમયી સદાશિવમયી માં પાહિ મીનામ્બિકે ॥

(શ્રીમચ્છઙ્કરભગવત્પાદાચાર્યવિરચિત શ્રીમીનાક્ષીસ્તોત્રાન્તર્ગતમ્)

શ્રીસચ્ચિદાનન્દભારતીમહાસ્વામિનાં ધ્યાનશ્લોકઃ -
સત્યસ્વરૂપં સદ્જ્ઞાનનિષ્ઠં સાક્ષાચ્છિવં પરમ્ ।
સદા દાનરતં દાન્તં સચ્ચિદાનન્દમાશ્રયે ॥

શ્રીગણાધિપતયે નમઃ ।
શ્રીસચ્ચિદાનન્દગુરુભ્યો નમઃ ॥

## શ્રીમીનાક્ષીશતકમ્

બાલાર્કકોટિરુચિરે વરદે વરેણ્યે
બાલે બલપ્રમથને મદનપ્રવીણે ।
લીલાસહસ્રનિપુણેશમહાવિહાર-
શીલે સુમીનનયને કુરુ મઙ્ગલાનિ ॥ ૧॥

શર્વાણિ વાણિ કમલે કમલાસનસ્થે
મીનાક્ષિ કાઙ્ક્ષિતવરપ્રદકામરૂપે ।
સવ્યેતરેણ ચ કરેણ ગૃહીતચારુ-
ક્રીડાશુકે કરુણયા કુરુ સાક્ષરં મામ્ ॥ ૨॥

કલ્યાણદે કમલલોચનકઞ્જવક્ત્રે
કામાક્ષિ કામિનિ કલાનિપુણે કુલીને ।

કામારિણા હૃતનિજાર્ધશરીરભાગે
કારુણ્યતઃ કુરુ ભવત્પદિ માં ચ ભક્તમ્ ॥ ૩॥

અત્યન્તચારુવસને રસનાગ્રનૃત્યત્-
વિદ્યાવિશારદવિધાતૃસુરપ્રપૂજ્યે ।
યાજ્યાદિગીતમખગેયપુરોનુવાક્યે
વાક્યે મમેશ્વરિ સુધાં પ્રણિધેહિ માતઃ ॥ ૪॥

યાગસ્સરાગવિહિતસ્સુપવિત્રતીર્થ-
સાર્થૈરવાપ્યમથ ભોગ ઉપાત્તભોગઃ ।
યોગો નિયોગપરિદૂષિત એષ તસ્માત્
મીનાક્ષિ તાવક પદસ્મરણં પ્રદેહિ ॥ ૫॥

ગોપીજનપ્રભવકામવિહારવીર્ય-
વિખ્યાતકીર્તિપરમઃ પુરુષઃ પુરાણઃ ।
તત્પૌરુષાકૃતિરિતિ પ્રભુરમ્બિકે ત્વાં
શ્રીશઙ્કરઃ કિલ પુરા સમુદાજહાર ॥ ૬॥

બ્રહ્માણ્ડમણ્ડલમિદં હિ મહાનિધાનં
ભાવત્કમઙ્ગલમહાયશસામપારમ્ ।
ત્રેતાયુગોદિતધરાતનયાધિનાથ-
શ્રીરામનામજપપૂરિતપુણ્યપુઞ્જે ॥ ૭॥

ત્વં કામધેનુરથ કલ્પતરુસ્ત્વમેવ
ચિન્તામણિર્મણિવરો મમ મીનનેત્રે ।
રમ્યાણિ તાવકચરિત્રસહસ્રકાણિ
શ્રીપાણ્ડ્યરાજતનયે રમયન્તિ ચાસ્માન્ ॥ ૮॥

કલ્યાણકારણશરાસનશાસિતારિઃ
કારુણ્યપૂર્ણસુમનાઃ સ પુરા પુરારિઃ ।
દેવિ ત્વદીયતપસા કિલ સન્તુતોષ
ભ્રાજદ્વૃષોપરિ વસન્ વૃતપઞ્ચવક્ત્રઃ ॥ ૯॥

હાલાસ્યનાયકિ હરો હૃતકામદર્પઃ
સર્પૌઘમણ્ડિતવપુર્ભૃતસત્કપાલઃ ।
શૂલપ્રધાવિતરતત્સુરવૈરિસઙ્ઘો
હુઙ્કારદુષ્ટદમનસ્તવ સૌમ્યરૂપઃ ॥ ૧૦॥

નારાયણપ્રણતપાદપવિત્રપાંસુ
પાંસુપ્રતારિતસમસ્તનિરસ્તબોધે ।
કસ્તૂરિકાતિલકનામકભૃઙ્ગસઙ્ગ-
ભ્રાજન્મુખાખ્યકમલે વિમલે નમસ્તે ॥ ૧૧॥

માણિક્યગર્ભિતલસત્સુભગત્વદીય-
નાભીસરોજવરવાસપરા રમૈષા ।
ભૂષાસહસ્રપરિભૂષિતરમ્યરૂપ-
યોષાવિશેષપરિપૂજિતપત્સરોજે ॥ ૧૨॥

ત્વન્નૂપુરધ્વનિવિમોહિતવિશ્વમેતત્
ચિન્તા પરં કિમનયા કૃતમત્ર ભદ્રમ્ ।
ત્વાં સર્વકર્મફલદાં સકલસ્વતન્ત્રાં
કેચિદ્વિદુર્ન ખલુ કેચન બોધશૂન્યાઃ ॥ ૧૩॥

દેદીપ્યમાનતનુમધ્યગહેમપટ્ટો
જાજ્વલ્યમાનશુભરત્નમણિપ્રકૂટઃ ।
રમ્ભોરુયુગ્મપરિવેષ્ટિતરાગરક્ત-
વાસસ્તુ વાસવમનઃ કુરુતે સરાગમ્ ॥ ૧૪॥

ત્વત્કુક્ષિનિષ્ઠમિદમમ્બ જગત્ત્રયઞ્ચ
ત્વત્તેજસા ખલુ વિભાન્તિ સમસ્તલોકાઃ ।
આજ્ઞાધરાસ્તવ મહેશ્વરિ તે દિગીશ-
બ્રહ્મેશવિષ્ણવ ઇમેઽપ્યભવદ્ગુણસ્તે ॥ ૧૫॥

કાઞ્ચીસ્રગમ્બ તવ પુષ્પિતહાટકાન્ત-
ર્વિભ્રાજમાનવરદીપશતપ્રભૌઘામ્ ।
સત્કિઙ્કિણીગણઝણાવૃતહૈમનાગ-
શ્રીમન્મુખાનતશુકાવલિરાજિતશ્રીઃ ॥ ૧૬॥

આસીત્ત્વદીયજઘનં ઘનમિત્યવેક્ષ્ય
મેઘસ્સ ગર્જિતદિવઃ કુપિતોઽધુનાપિ ।
તદ્યુક્તમેવ હિ તદસ્તુ ઘને ઘનત્વં
તચ્ચેત્ત્વદીયજઘનેન સમાસ્થિતં સ્યાત્ ॥ ૧૭॥

શૈલોપમસ્તનવિધૂતમહાભયોઽયં

ત્વામાશ્રિતો મદન એષ મહેશશત્રુઃ ।
તં તાદૃશં ગિરિવરં પ્રતિપદ્ય શૌર્યં
તેજસ્સમાજકૃતસાલવિધિસ્તનોતિ ॥ ૧૮॥

ત્વત્કણ્ઠનાલપરિચુમ્બિતલાલસેવ
લક્ષ્મીર્વિભાતિ તવ કણ્ઠગભૂષણૌઘૈઃ ।
હસ્તોલ્લસજ્ઝણઝણીકૃતકઙ્કણાનિ
કાર્તસ્વરપ્રભવસુપ્રભયાર્જિતાનિ ॥ ૧૯॥

રત્નપ્રભાધલધલીકૃતસત્કપોલ-
શ્રીકુણ્ડલોજ્વલલસચ્છરદિન્દુવક્ત્રે ।
માયે મહેશ્વરમનોહરરમ્યરૂપે
માં પાહિ મીનનયને મધુરાધિનાથે ॥ ૨૦॥

ત્વદ્બાહુદણ્ડમુપલભ્ય શશાસ શમ્ભું
ચેતોભવશ્ચિરમનઙ્ગતયાતિકોપઃ ।
તસ્માદગેશ્વરસુતે જગદીશ્વરોઽપિ
સ્થાણુત્વમભ્યુપગતઃ ખલુ ખિન્નચેતાઃ ॥ ૨૧॥

ત્વત્પાણિસૌન્દરપરાજિતપઙ્કજાનિ
ત્વચ્છોણપાદયુગલે નિપતન્તિ નિત્યમ્ ।
નમ્રા અપિ પ્રભુજનેષુ સુદુર્જયેષુ
ધાર્યન્ત એવ શિરસા સકલૈર્જનૈસ્તે ॥ ૨૨॥

રાજજ્જપાકુસુમરાગનિભપ્રભાણિ
સર્વાણિ દેવિ તવ પાણિપદોદ્ભવાનિ ।
શર્વાણિ તાવકનખાનિ તવોચિતાનિ
સૌન્દર્યસારઘટિતાનિ સુમઙ્ગલાનિ ॥ ૨૩॥

માધુર્યવર્યમહિમાપહૃતાઙ્ગરઙ્ગ-
ભૃઙ્ગક્રમોલ્લસિતસત્કમલાઢ્યહસ્તે ।
ગામ્ભીર્યગુમ્ફિતલસદ્ હૃદયે દયાસ્મિન્
દૈત્યપ્રહારપરશુપ્રવરપ્રિય સ્યાત્ ॥ ૨૪॥

હારો વિહારવિષયાબ્ધિજમૌક્તિકૌઘ-
શ્રેણીસહસ્રપરિનિશ્ચિતસારતેજાઃ ।
ત્વત્કણ્ઠગશ્શિવદ એષ મમાસ્તુ માતઃ

શાન્તિપ્રદશ્ચ શતકોટિયુગેષુ સિદ્ધઃ ॥ ૨૫॥

ત્વન્નાસિકાપુટવિડમ્બિતભદ્રરૂપા
ભદ્રે વિભાતિ ભગવત્યધુનેન્દિરાહો ।
સા શ્રીર્જુહોતિ વદને મદનાગ્નિહોત્રે
લાવણ્યકલ્પિતમહોલ્લસદાજ્યધારામ્ ॥ ૨૬॥

શ્રૃઙ્ગારશાન્તિનિલયે શિવદેવકાન્તે
રાગાનુરઞ્જિતરદે વરચારુવીણે ।
પક્ષે સિતપ્રથમતો ભુવિ દૃષ્ટબાલ-
ચન્દ્રોપમં ભુવિ પતેત્ત્વયિ મેઽમ્બ ચેતઃ ॥ ૨૭॥

સઙ્ગીતશાસ્ત્રરસિકે વસ પુષ્પરાગ-
વ્યક્તાનુવાદપરમાઙ્ગુલિપઞ્ચકાઢ્યે ।
બિમ્બાધરે બલસમાહૃતરત્નસાર-
નાસામણિભ્રમણસમ્ભ્રમસમ્ભૃતાસ્યે ॥ ૨૮॥

સૌવર્ણગોપુરપુરોગતપૌરરાજ-
ચ્ચક્ષુશ્ચકોરપરિતોષણચન્દ્રરૂપે ।
ચાઞ્ચલ્યરૂપગુણસમ્ભૃતચન્દ્રસૂર્ય-
નેત્રોભયોદયવિભાસિતસર્વલોકે ॥ ૨૯॥

શ્રૃઙ્ગારચારુવચને રચનાપ્રવીણે
શ્રીવત્સલાઞ્છનમહોદયહેતુભૂતે ।
શ્રીસુન્દરેશદયિતે પ્રણતોસ્મિ ચ ત્વાં
શ્રીપ્રાપ્તયે શ્રિતજનાવનલાલસોઽહમ્ ॥ ૩૦॥

તેજસ્તરઙ્ગિતસુમઙ્ગલતારકસ્થ-
લાવણ્યજાલજલપૂરિતસાગરાન્તઃ ।
શીઘ્રપ્રચારણપટૂ ઇવ દેવિ મત્સ્યૌ
નેત્રે ઉભે ચ તવ પાણ્ડ્યસુતે વિભાતઃ ॥ ૩૧॥

સત્કુઙ્કુમાઙ્કિતલલાટમહાપ્રભાવઃ
કૈર્વર્ણ્યતે જગતિ સર્વમનોહરાસ્યે ।
ચન્દ્રપ્રકાશઘટિતસ્ફટિકોપમાન-
કામાતિગપ્રભુમનઃ કલુષીકરોતિ ॥ ૩૨॥

ત્વત્ક્લેશપાશપરિસૃષ્ટજપાવિશેષ-
સ્પષ્ટસ્ફુરત્કઠિનપીનનિતમ્બદેશે ।
તાદૃગ્જપાકલિતશોભનગન્ધયુક્ત-
શ્રીમલ્લિકાકુસુમકલ્પિતમાલિકૌઘે ॥ ૩૩॥

માનોન્નતે મદનચારણચક્રભૂતે
માર્તાણ્ડમણ્ડલમહાસનપદ્મસંસ્થે ।
માહેશ્વરિ પ્રશમયાશુ મમાન્તહીનાં
તૃષ્ણાં ત્રિણેત્રદયિતે દયયાર્દ્રભાવે ॥ ૩૪॥

માઙ્ગલ્યમન્દિરમિદં મદનોદયાઢ્યં
સાઙ્ગં સુલક્ષણમરક્ષણજાતકાર્શ્યમ્ ।
અવ્યક્તવાદપરકોકિલવાણિ વાણી-
મુલ્લઙ્ઘ્ય તિષ્ઠતિ શરીરમલઙ્કૃતં તે ॥ ૩૫॥

મન્દાકિનીવરસરિત્સલિલાભિષેકે
મન્દસ્મિતે મલયચન્દનચર્ચિતાઙ્ગિ ।
મન્દારનામકમહીરુહપુષ્પપૂજ્યે
મન્દપ્રસિદ્ધગમને મહસા વિભાસિ ॥ ૩૬॥

વૈડૂર્યવજ્રઘટિતાત્મમહાકિરીટે
ઘણ્ટારવૈરથ વિધેયસુધૂપદીપે ।
નાનાવિધાર્ચકસમર્પિતભક્ષ્યભોજ્યે
પૂર્ણે વસાન્તરિહ મે ચિરમન્નપૂર્ણે ॥ ૩૭॥

દિવ્યામ્બરે કનકરત્નવિભૂષિતાઙ્ગે
દિક્પાલવન્દિતપદે પરમાર્થરૂપે ।
નીરાજનોજ્જ્વલમહોલ્લસદાત્મરૂપે
નિત્યે જયે વિજયદે જય વિશ્વરૂપે ॥ ૩૮॥

કર્પૂરદીપવિહિતાત્મશુભે શુભાના-
માધારભૂતચરણે કરુણારસાઢ્યે ।
ગાનૈરનેકવિધરાગવિશેષયુક્તૈ-
ર્ગીતે સુમઙ્ગલપદે ત્વયિ દેહિ દાસ્યમ્ ॥ ૩૯॥

પ્રત્યક્ષલક્ષણપદે પરમપ્રમાણે
પ્રામાણ્યવાદવિદિતે પરમાર્થનિષ્ઠે ।

નિત્યાનુમેયનિજરૂપધરે ધરણ્યાં
નૈવોપમાનમિહ તે કૃતશબ્દશાસ્ત્રે ॥ ૪૦॥

વેદત્રયો વિદિતકર્મકૃતક્રમશ્રી-
પ્રાધાન્યવાક્યનિચયપ્રતિપાદ્યરૂપે ।
કલ્યાણિ કારણવિશેષવિશિષ્ટકાર્ય-
ન્યાયાભિધાનસુનયે જય દેવિ નિત્યમ્ ॥ ૪૧॥

શ્રૃઙ્ગારમઙ્ગલમહોજ્જ્વલદિવ્યભાષે
ભાષાવિશેષવિષયીકૃતભાવરૂપે ।
શેષાદિવિદ્વદનુભાવિતશબ્દરૂપે
સાઙ્ગૈસ્સમસ્તનિગમૈરપિ વેદ્યરૂપા ॥ ૪૨॥

સૌવર્ણપાત્રઘટિતં પરમામૃતાન્નં
સાજ્યં સશર્કરમિદં રસનાપ્રમોદમ્ ।
ત્વદ્ભુક્તશિષ્ટમિહ ભૂમિતલે ભજેમ
ભ્રાજત્સુધારસમનેકબુધૈરુપાસ્યમ્ ॥ ૪૩॥

સન્ધ્યાસુ સદ્દ્વિજવરૈરનુગીયમાને
ગાયત્રિ ગાનપરમે સુપવિત્રગાત્રિ ।
સાવિત્રિ સર્વવરદે સવિતૃસ્વરૂપે
તાર્તીયરૂપસવનેઽસિ સરસ્વતી ત્વમ્ ॥ ૪૪॥

રાજત્સુરત્નશુભમણ્ટપકાન્તરસ્થૈ-
ર્દીપૈરનેકશતકોટિસહસ્રસઙ્ખ્યૈઃ ।
ત્વન્મન્દિરં જનનિ ભાતિ મહાપ્રકાશં
કૈલાસશ્રૃઙ્ગમિવ ભૂમિતલેઽપિ સાક્ષાત્ ॥ ૪૫॥

અમ્બ ત્વદીયશુભમન્દિરપટ્ટશાલાઃ
શૈલોન્નતા વરશિલારચિતા વિશાલાઃ ।
બહ્વન્તરાન્તરવિભાગવિશોભમાનાઃ
ન ક્વાપિ ભાગ્યભરિતે ભુવિ દૃષ્ટપૂર્વાઃ ॥ ૪૬॥

નન્દીશચણ્ડગજવક્ત્રકુમારમુખ્યાઃ
શ્રીવીરભૂપવિભવાર્ચિતવીરભદ્રઃ ।
સર્વેઽપિ દૈવતગણાસ્સમુપાસતે ત્વા-
મીશાનદેવદયિતે સશિવાં શિવાર્થમ્ ॥ ૪૭॥

સોપાનપઙ્ક્તિસહિતં તવ સારસાખ્યં
તીર્થં મહોજ્જ્વલજલં મુનિમુખ્યસેવ્યમ્ ।
પુણ્યં પુરાણમરવિન્દસમં સમન્તા-
ત્વજ્જન્મકારણમિતિ પ્રથિતં પૃથિવ્યામ્ ॥ ૪૮॥

કિં તીર્થમત્ર ભુવિ વા તવ પુષ્કરિણ્યા
સામ્યં પ્રયાતુ બહુપુણ્યજલૌઘયામ્બ ।
યત્રાપ્લુતોઽત્ર મનુજોઽપ્યજડો ભુવિ સ્યા-
ન્નાનાજલગ્રહસમાકુલતોયજાલે ॥ ૪૯॥

ક્વૈરાવતસ્તવ ગજેષુ ગુણોત્તરેષુ
નોચ્ચૈશ્રવાસ્તવ હયાધિકતાં પ્રયાતિ ।
તાવત્કવાદ્યનિનદૌઘધુતાત્મદર્પાઃ
સ્વર્ગેઽપિ દેવવરદુન્દુભયઃ કિલાસન્ ॥ ૫૦॥

ત્વદ્ગોપુરાણિ સુરશૈલમહોન્નતાનિ
નાનાવિધાનિ મધુરાપુરભૂષણાનિ ।
આદ્યન્તમધ્યવિચરદ્વરવાનરાણિ
મીનાક્ષિ તાવકયશો વિકિરન્તિ દિક્ષુ ॥ ૫૧॥

શ્રૃઙ્ગોન્નતા બહુદુધાસ્તવ ધેનવોઽમૂ-
સ્તુષ્ટાસ્તુષારકિરણોદ્ભવચન્દ્રિકાભાઃ ।
પુષ્ટાઃ પુરાણપુરુષં ભવમાશ્રયન્ત્યઃ
સ્પૃષ્ટાઃ પુનન્તિ પુરુષૈઃ પુરુષાનશેષાન્ ॥ ૫૨॥

ત્વત્પાદપદ્મયુગલસ્મરણેન માતઃ
નિત્યં પ્રબોધસમયે વિબુધપ્રબોધ્યે ।
ઇષ્ટં ચ મૃષ્ટમશનં ભુવિ ધર્મનિષ્ઠા
બુદ્ધિસ્સમૃદ્ધિરથ ગેહગતા ભવેન્નઃ ॥ ૫૩॥

શ્રીચક્રતઃ કૃતમહોજ્જવલમન્દિરા ત્વં
ભક્તેષુ યાસિ ચ ભજત્સુ તથેન્દિરાત્વમ્ ।
ઇન્દૂપમાનવદને સદને મદીય-
હૃત્પદ્મરૂપિણિ સદા ભવ સુસ્થિરા ત્વમ્ ॥ ૫૪॥

યાં દેવતાસ્સ્વરિતિ ભૂતલમેવ મત્વા

નિત્યં પ્રભાતસમયે સહ શઙ્કરેણ ।
તામ્બૂલચર્વણપરાન્નવરત્નપીઠે
ભેજુર્ભજન્તિ ભવતીમપિ તાં ભજેઽહમ્ ॥ ૫૫॥

વૈરાગ્યશાન્તિનિલયં પુરુષં પુરાણં
નિત્યક્રિયાદિભિરુપાસિતમન્તશૂન્યમ્ ।
મૂર્ધસ્થગાઙ્ગસલિલં જટિલં ત્રિનેત્રં
ભસ્મપ્રિયં ભજસિ ભૂતસહાયમીશમ્ ॥ ૫૬॥

ફાલાનલં ભવમજં ભવનાશહેતું
કાલં કલાનિધિમનન્તદૃશં વિશુદ્ધમ્ ।
વૈય્યાઘ્રચર્મવસનં જિતકામમીશં
આકાશકેશમનિશં ભજસે ભવાનિ ॥ ૫૭॥

નિર્ધૂતમાનમનઘં વિજિતેન્દ્રિયઞ્ચ
વેદાન્તવેદ્યમનહઙ્કૃતિમપ્રમેયમ્ ।
લોકોત્તરોર્જિતગુણે ગુણહીનમેવ
રાજન્યદેવતનયે વૃણુષે કિમેતત્ ॥ ૫૮॥

ત્વદ્રૂપવિત્સ ચ હરોઽથ હરસ્ય રૂપં
ત્વં વેત્સિ મત્સ્યનયને વિનયાનતાસ્યે ।
ઇત્થં પરસ્પરગતં ખલુ સખ્યમમ્બ
કોવેહ વેદ યુવયોશ્શિવયોર્મહત્વમ્ ॥ ૫૯॥

ત્વામદ્રિરાજતનયામથ ભૂતલસ્ય
ભદ્રાર્થમાગતવતીં વિદુરાત્મવન્તઃ ।
ત્વં પદ્મમાલિનિ ચ માનિનિ માનયુક્તં
માં મીનલોચનધરે કુરુ ગૌરવર્ણે ॥ ૬૦॥

દેવિ સ્વયંવરપદં પ્રતિપદ્ય દેવઃ
પ્રત્યક્ષતસ્તવ કુચદ્વયમૈક્ષતેતિ ।
આશ્ચર્યમત્ર વિબુધૈરપિ નૈવ કાર્યં
લોકેષ્વમીષુ સકલેષુ સ હિ ત્રિનેત્રઃ ॥ ૬૧॥

શમ્ભોર્વિવાહસમયે શિવપાર્શ્વગાં ત્વાં
આલોક્ય નાકસદનાસ્સકલાસ્સયોષાઃ ।
ભ્રાન્તા બભૂવુરથ તેઽમ્બ કટાક્ષમૂઢા

તેऽપિ સ્મ તે વિલિખિતેરવિધિર્વિધિશ્ચ ॥ ૬૨॥

શ્રીકણ્ઠચારુકરકઞ્જયુગપ્રબદ્ધ-
માઙ્ગલ્યસૂત્રપરિશોભિતકમ્બુકણ્ઠિ ।
બ્રહ્મેહ શાશ્વતમનાકૃતિ યાવદેવ
તાવચ્છિવાનિ શિવતસ્તવ સન્તિ દેવિ ॥ ૬૩॥

ભિક્ષાશનં ખલુ તદાપિ ન ભગ્નમસ્મિન્
શમ્ભૌ ભવત્કરગૃહીતવરાન્નદાનૈઃ ।
ઇત્થં પ્રિયઙ્કરતયા સહ ભોજનેऽમ્બ
શમ્ભુપ્રિયેતિ કથિતાસિ જગત્ત્રયેऽપિ ॥ ૬૪॥

ત્વત્કઞ્જવક્ત્રપરિશોભિતમન્દહાસ-
ભ્રૂલ્લાસદર્શનપરઃ પરમેશ્વરોऽપિ ।
સાનન્દમન્દહસનાનુવિધેયસાર-
સમ્ભાવનસ્સ ચ બભૂવ પુરા ત્રયીશઃ ॥ ૬૫॥

પાણિગ્રહેણ પરિતુષ્ટમનાસ્તવાભૂત્
શમ્ભુઃ પ્રભુર્વિભુરભૂતવિભાવિતાઙ્ગિ ।
સંસારગહ્વરમહાગહનં પ્રવિષ્ટઃ
સંસારિણાં ગતિરયં ગુણસાક્ષિભૂતઃ ॥ ૬૬॥

શમ્ભુપ્રભાવશુભવર્ણનયાભિયુક્ત-
જિહ્વા જયત્યથ વિભાવિતશુદ્ધવર્ણા ।
ઇત્થં પતિં ખલુ નિષેવ્ય પરં પુમાંસં
સંસાધિતાખિલસુખાનિ વિશાલનેત્રે ॥ ૬૭॥

હ્રીઙ્કારવાદસુલભે હિતદે સમસ્ત-
લોકસ્ય લોચનગતાઞ્જનશોભનાઢ્યે ।
શ્રીસુન્દરેશ્વરપદે વિહિતાન્તરઙ્ગે
શ્રીમત્તરઙ્ગિતપદસ્તુતિભિસ્સ્તુતાઙ્ગે ॥ ૬૮॥

સન્તોષયુક્તહૃદયે સતિ સારવાક્યે
વાક્યે મહત્યપિ વિભાતવરાત્મનિષ્ઠે ।
મહ્યં પ્રદેહિ વરદે ભુવિ ચ પ્રતિષ્ઠાં
કાષ્ઠાં કલાદિરહિતામથ યોગિલભ્યામ્ ॥ ૬૯॥

રઙ્ગસ્થલીવિહિતનર્તનવાર્તયાહો
સર્વેઽપિ દેવિ તવ સન્નિધિમેત્ય દેવાઃ ।
હૃષ્યન્તિ હન્ત મનસા વચસા ચ ભૂયઃ
પુષ્ણન્તિ ભદ્રવપુષા ચ વિષાદશૂન્યાઃ ॥ ૭૦॥

ત્વત્પાદસારસનિબદ્ધસમૃદ્ધબાલ-
ઘણ્ટારવૈર્ઘલઘલીકૃતનાટ્યરઙ્ગે ।
નાટ્યાનુરઞ્જિતનયોજ્જ્વલચારુલીલા-
કોલાહલાહૃતસમસ્તસુરાન્તરઙ્ગે ॥ ૭૧॥

તાલપ્રભેદગતિનૃત્યમહાવિહાર-
નિત્યોત્સવેન પરિતોષિતનાગહારે ।
ત્વત્સામ્યમેતિ ન રમા ન સરસ્વતી ચ
શક્રપ્રિયા ન ચ શચી ન ચ દેવવધ્વઃ ॥ ૭૨॥

ત્વદ્વક્ત્રનિસ્સૃતમૃદૂજ્જ્વલસારવલ્ગુ-
વ્યક્તસ્વરામૃતરસાક્ષરવાક્યલેશૈઃ ।
ક્ષોણીભૃતો હરિહરૌ વિધિમુખ્યદેવાઃ
સર્વેઽપિ વિસ્મિતહૃદઃ કિલ નૃત્યકાલે ॥ ૭૩॥

નૈવ શ્રમો ન ચ તવામ્બ વરાઙ્ગજાત-
સ્વેદામ્બુ શૂન્યગતયો ન ચ તાલભેદાઃ ।
નૈવાસિ શઙ્કિતમનાઃ પુનરેવ ધીરાઃ
પશ્યત્સુ દૈવતજનેષ્વપિ રઙ્ગદેશે ॥ ૭૪॥

ચન્દ્રોદયે સતિ શરદ્યતુલશ્રિયાહો
વારાન્નિધિર્ધ્વનિજિતેતરશબ્દજાલઃ ।
વર્ધેત હર્ષવશગો નિશિ વા યથૈવ-
મુત્સાહ એષ તવ વૃદ્ધિમુપૈતિ નિત્યે ॥ ૭૫॥

ચક્રાકૃતિભ્રમણધૂતપટાન્તભાત-
કાર્તસ્વરાભશુભજાનુવિહાર એષઃ ।
લક્ષ્મીં તનોતુ નિતરામરવિન્દપાદ-
સ્પર્શપ્રભૂતધરણીતલશબ્દરમ્યઃ ॥ ૭૬॥

નાસક્તમત્ર ચ મનો ભુવિ કસ્ય વાઽભૂત્
સાક્ષાદપિ ત્રિણયનઃ કૃતકામમૈત્રઃ ।

યત્રાભવન્નિયતચિત્તતયા સમાધિ-
સ્થિત્યેવ યોગપરમસ્તવ નૃત્યસારે ॥ ૭૭॥

આનન્દપૂર્ણહૃદયે વિશદાત્મલીલે
માઙ્ગલ્યસૂચકમનોહરચારુશીલે ।
ચાઞ્ચલ્યગર્ભિતશરીરવિશેષણાઙ્ગે
રઙ્ગસ્થલે જય જયે જિતજાતરૂપે ॥ ૭૮॥

નૃત્યેન મીનનયને ન હિ સા હિ રમ્ભા
નૈવોર્વશી નવનવેન તિલોત્તમા ચ ।
હા પ્રીતિમત્ત્વજનને તવ દેવિ શક્તા-
સ્તિસ્રસ્તિસૃષ્વપિ લસજ્જગતીષુ ગીતાઃ ॥ ૭૯॥

ત્વાદૃગ્જનેષુ તપસા પ્રથિતેષુ લોકે
નાનાકલાનિપુણતેતિ ન ચિત્રમત્ર ।
નારાયણોઽપિ નવનીતહરો યતોઽભૂત્
નૃત્યેન તોષિતસમસ્તવધૂસમૂહઃ ॥ ૮૦॥

કારુણ્યશઙ્કરમજે કમનીયરૂપં
કાન્તાસહસ્રપરિભાવિતપદ્મવક્ત્રમ્ ।
વિભ્રાજિતાખિલદિગન્તરચન્દ્રમૌલિં
સન્તોષયન્તમનિશં કુરુતે વિનોદૈઃ ॥ ૮૧॥

તાટઙ્કબાલનવિભાતવિચિત્રવર્ણ-
વિદ્યોતમાનસકપોલવિમોહિતોઽયમ્ ।
તામેવ નિત્યમગજામતિસમ્પ્રહૃષ્ટો
ધ્યાયત્યનન્યવિષયો વૃષવાહનોઽપિ ॥ ૮૨॥

દેવિ ત્વદાસ્યસરસીરુહસક્તભૃઙ્ગ-
ઝઙ્કારલક્ષણમહામદનપ્રસઙ્ગઃ ।
સઙ્ગીતશાસ્ત્રરહસાકૃતનિત્યસઙ્ગઃ
શૃઙ્ગારશાસ્ત્રશિરસા શ્રિતદીર્ઘશૃઙ્ગઃ ॥ ૮૩॥

ત્વદ્ભોગલમ્પટમના હિ મહાનુભાવઃ
શર્વસ્સ કોટિમદનોપમરમ્યરૂપઃ ।
નિત્યં તવૈવ ગૃહવાસપરો બભૂવ
ત્વન્મોહિતો રતિવિશાલસુખાનુરક્તઃ ॥ ૮૪॥

ત્વદ્વક્ત્રચુમ્બનસુપીતસુધારસોઽયં
પઞ્ચાનનઃ પરિગૃહીતસપઞ્ચબાણઃ ।
નોચેત્કુતો ધવલિમાત્ર મહેશગાત્રે
સ્યાચ્ચન્દ્રચારુકિરણોદ્ભવચન્દ્રિકેવ ॥ ૮૫॥

આઘ્રાય તાવકમુખામ્બુજગન્ધમીશો
મેને તપઃ ફલમહસ્સ તપોનિધાનઃ ।
આલિઙ્ગ્ય ગાઢમનઘો ભવતીં કૃશાઙ્ગીં
કામોદધૌ સહ મમજ્જ વિધૂતલજ્જઃ ॥ ૮૬॥

હાસૈર્વિહારપરમૈઃ કૃતકૌતુકાભ્યાં
પૂર્વોત્તરક્રમવિશેષવિશોભિતાભ્યામ્ ।
સંવર્ધિતોઽનલ ઇવાજ્યહુતો યુવાભ્યાં
કામાનલઃ કિલ રહો ગૃહમધ્યમાનઃ ॥ ૮૭॥

મેને કૃતાર્થમગરાજમજો ગૃહેશો
યસ્યાસિ મીનનયને દુહિતા સભદ્રા ।
ત્વત્કામકૌતુકમનઃ પરિતુષ્ટભાવઃ
પૂર્ણોઽપિ પૂર્ણરતિમેત્ય વિધૂતશોકઃ ॥ ૮૮॥

ભોગીન્દ્રકલ્પિતકરસ્થિતકઙ્કણશ્રીઃ
ભોગશ્રમેણ સહિતશ્શયનં ચિકીર્ષુઃ ।
નાન્યં ગિરિં વ્રજતિ હન્ત ગિરીશ્વરોઽયં
મત્વા ગિરિં ગુરુતરં જઘનં ઘનં તે ॥ ૮૯॥

કસ્તૂરિકૈવ તવ કણ્ઠગતા સમૃદ્ધા
ભસ્મપ્રિયસ્ય ચ ગલે પ્રતિબિમ્બતાઽભૂત્ ।
તેનાતિશુભ્રશુભગાત્રધરોઽપિ શમ્ભુઃ
ત્વત્સઙ્ગતસ્સતિ બભૂવ સ નીલકણ્ઠઃ ॥ ૯૦॥

કામાઙ્કિતાકૃતિવિશેષવિરાજમાનૌ
તામ્બૂલરક્તવદનૌ શ્રમતોયસિક્તૌ ।
ક્ષેમઙ્કરૌ ચ જગતઃ પિતરૌ યુવાઙ્કૈઃ
સેવ્યૌ સમસ્તવરદૌ ભુવિ દેવિ ન સ્તઃ ॥ ૯૧॥

સૂર્યોદયાભરદને સુરપૂજ્યપાદે

સૂતાદિભિસ્સ્તુતગુણે સુખબોધસારે ।
સૂતેષુ સૂક્તિરચિતેષુ સુખેન બોધ્યે
સૂચ્યગ્રબુદ્ધિવિશદે સુતમમ્બ પાહિ ॥ ૯૨॥

સઙ્ગીતસારહૃદયે સમદૃષ્ટિયુક્તે
સમ્યક્શુકેન્દ્રપરિભાષિતનામજાલે ।
સાયન્તનાગતસમાનસખીસમેતે
સંસારસાગરગતં પરિપાહિ માં ત્વમ્ ॥ ૯૩॥

સન્તાનકામ્યફલદે સવિતૃપ્રસૂતે
સન્દેહસાધિતરમે સમયપ્રતિષ્ઠે ।
સાધ્યામૃતાખ્યવરતીર્થવિશોધિતાન્ત-
સ્સાધારણેતરમનઃ કરણૈરુપાસ્યે ॥ ૯૪॥

માત્રાચતુષ્ટયપદે સુખબોધમાત્રે
યાત્રાવિચારણપરે પરમાત્મરૂપે ।
માત્રાસ્મિ પાલિતભવો જગતામમીષાં
નેત્રા ચ નેત્રપરિદૂષિતપદ્મજાતે ॥ ૯૫॥

મીનાક્ષિ તાવકરથોત્સવસમ્ભ્રમાર્થ-
માહેપ્રયુક્તવચસઃ પથિ સંસરન્તિ ।
પશ્યેમ મીનનયનામથ સુન્દરેશં
શીઘ્રં સખે સર સરેતિ દિગન્તસંસ્થાઃ ॥ ૯૬॥

એવં જનાસ્તુ શતશોઽથ સહસ્રશોઽપિ
ત્વામેત્ય નિત્યમવિલમ્બિતદીક્ષયામ્બ ।
યુક્તાં ચ યુક્તહૃદયાશ્શુચયસ્સમૌનાઃ
નેત્રોન્નતાઃ પ્રતિદિનં ભવતીં ભજન્તે ॥ ૯૭॥

ત્વદ્વાહનાનિ વૃષસિંહગજાશ્વહંસ-
મુખ્યાનિ માનવકૃતાનિ મહોન્નતાનિ ।
અઙ્ગાનિ તાવકરથોત્સવકર્મણશ્ચ
સાઙ્ગાનિ સર્વનયનોત્સવસાધનાનિ ॥ ૯૮॥

પ્રાકારસારપરિકલ્પિતતત્સરન્ધ્ર-
મૂર્ધાવલીમુદિતમાનસરાજહંસે ।
નેત્રાવલીકલિતહેમરથોપરિસ્થ-

કાન્તાનુધાવિતરથે રથઘોષપૂર્ણે ॥ ૯૯॥

સાક્ષાદિવામરનગશ્શતહેમશ્રૃઙ્ગો-
રત્નૌઘરાજિતરથઃ પ્રચલત્પતાકઃ ।
આભાતિ ભાનુકિરણપ્રતિભાસમાન-
સ્તમ્ભાયુતોજ્જ્વલસુવર્ણવધૂસમૂહઃ ॥ ૧૦૦॥

તાવત્કભાવિતસુવર્ણકલાવિસૃષ્ટ-
સ્તમ્ભસ્ફુરદ્ઘટિતચક્રરથોપમામ્બ ।
સા સ્યાચ્છશાઙ્કશતકોટિમહોદય શ્રી-
રેકત્ર ચેન્મિલતિ દેવિ શરન્નિશાયામ્ ॥ ૧૦૧॥

વૈકુણ્ઠગશ્રિયમસાવિહ નીલકણ્ઠઃ
કણ્ઠીરવેણ સદૃશસ્વકવિક્રમેણ ।
કિં વાડહરદ્ધરતયા યદિ વા ન તત્સ્યા-
દ્ધૈમસ્સ તે રથવરઃ કથમીદૃશસ્સ્યાત્ ॥ ૧૦૨॥

તદ્વેગવેગિતરયો રથિનાં વરિષ્ઠઃ
પૌરપ્રદક્ષિણપરઃ પરમેશ્વરોડયં
ભૂતાનિ ભાવિતશિવાનિ શિવાર્જિતાનિ
કુર્વન્કૃપાલુરભિતઃ ખલુ યાતિ શીઘ્રમ્ ॥ ૧૦૩॥

તદ્ઘોષઘોષિતદિશો દશ કાશિતાસ્તત્ -
તેજોભિરુત્થિતરજઃ કણસમ્ભૃતાસ્તાઃ ।
સેના ચતુર્વિધબલા ચ સરાજવીરા
ત્વામેવ યાતિ પરમોત્સવપારવશ્યાત્ ॥ ૧૦૪॥

ત્વદ્દર્શનેન ચ જગજ્જિતસર્વકામ-
માબાલવૃદ્ધપશુપાલકવિશ્વભૂતમ્ ।
રામાસ્સુમઙ્ગલભવાસ્તવ દર્શનેન
રામાભિરામહૃદયામ્બુજસદ્મસંસ્થે ॥ ૧૦૫॥

શમ્ભુર્હિરણ્યકવચાવૃતદિવ્યમૂર્તિઃ
કેયૂરહારમકુટૈશ્ચ વિરાજમાનઃ ।
ગચ્છન્પુરસ્સ ભવતીમનુસમ્પ્રયાન્તીં
પ્રત્યઙ્મુખઃ કિલ પુનઃ પરિવીક્ષતેડમ્બ ॥ ૧૦૬॥

દેવિ ત્વદીયગુણસૃષ્ટગુણો હરોઽયં
ત્વદ્વક્ત્રસૌભગરસં પરિપીય દૃગ્ભિઃ ।
કિઞ્ચિદ્વલદ્વસનભાતઘનસ્તનાગ્રાં
દૃષ્ટ્વા મૃડસ્સ ભવતીં પુનરેતિ હૃષ્ટઃ ॥ ૧૦૭॥

તં તાદૃશં ચ રથિનં રથમધ્યસંસ્થા
કામેન કાન્તરિપુણા પ્રતિબોધિતેવ ।
વિદ્રાવયસ્યતુલવેગરથે રથાઙ્ગ-
સ્પર્શૈર્દૃઢૈશ્ચટચટીકૃતભૂતલે ત્વમ્ ॥ ૧૦૮॥

એવંવિધાનિ ચરિતાનિ બહૂનિ દૃષ્ટ્વા
સર્વેકૃતાર્થમનસો ભુવિ ભૂતસઙ્ઘાઃ ।
કલ્યાણદેકમલલોચનકાલકાલ-
કાન્તે કૃતોત્સવચયે જય લોકમાતઃ ॥ ૧૦૯॥

દેવિ ત્વદીયશુભગાત્રવરાભિષેકૈઃ
હારિદ્રતીર્થમભવચ્છુભદં વધૂનામ્ ।
તદ્ધારણસ્મૃતિનતીક્ષણસંસ્તવૈસ્તુ
સ્યાદેવ સર્વફલસિદ્ધિરિહૈવ નૃણામ્ ॥ ૧૧૦॥

કઞ્જાતપુષ્પવદને કમનીયગાત્રે
કારુણ્યરૂપરસપૂરિતચારુનેત્રે ।
તસ્મૈ નમો નમ ઇદં તવ સંવિધાત્રે
તુભ્યં ચ તસ્ય ચ વિધાતુરથૈવ માત્રે ॥ ૧૧૧॥

સૌભાગ્યદે ચ ધનદે જગદાધિપત્ય-
પ્રાગલ્ભ્યદે પુરુષદે પ્રમદાજનેષુ ।
યોષિત્પ્રદેઽથ સુતજન્મમહોત્સવસ્ય
દાત્રી ત્વમેવ મતિદાનરતા નમત્સુ ॥ ૧૧૨॥

દેવિ શ્રુતિશ્રુતિમતાં વચસાં વિદૂરે
વિદ્રાવિતાખિલશુભેતરકર્મજાલે ।
ઓઙ્કારનાદપરિભાવિતદિવ્યરૂપે
ત્વઙ્કારભેદરહિતા વસ મેઽન્તરઙ્ગે ॥ ૧૧૩॥

તાટઙ્કયુગ્મસહિતા ધૃતકણ્ઠભૂષા
લાવણ્યજાલલસિતા બહુભૂષણાઢ્યા ।

દૃષ્ટાસિ ચ સ્તુતપદાસિ મયેહ માતઃ
માં મૈવ વિસ્મર મહેશ્વરિ મીનનેત્રે ॥ ૧૧૪॥

ત્વત્કીર્તિતો જગદિદં પરિપૂર્ણમમ્બ
મીનાક્ષિ હાટકમયામ્બુજમધ્યસંસ્થે ।
બ્રાહ્મ્યાદિશક્તિરચિતાવરણે શિવાખ્યે
હાલાસ્યનાયકિ સદાઽપિ નમો નમસ્તે ॥ ૧૧૫॥

શ્રૃઙ્ગારપૂર્ણશતકં પરિપૂર્ણમેતત્
મીનાક્ષિકાશુભપવિત્રચરિત્રગર્ભમ્ ।
સન્તાનરૂપફલદં કૃતમઙ્ગલં તત્
સમ્પત્પ્રદં ભુવિ નૃણાં પઠતાં સુભદ્રમ્ ॥ ૧૧૬॥

સર્વેષુ વૈદિકપદેષુ યથાનુપૂર્વી
નિત્યા તથાસ્તુ મમ વાગ્રચિતે પ્રબન્ધે ।
સા સર્વવિસ્મયકરી કવિતારસજ્ઞ-
સન્તોષદા મમ હિમાચલજા કૃપાતઃ ॥ ૧૧૭॥

શ્રીપાણ્ડ્યરાજતનયાનિલયં પ્રપદ્ય
પ્રાતઃ પઠન્તિ મનુજા ભુવિ યે તુ ભક્ત્યા ।
માધ્યન્દિને ચ સવનેષુ ચ યોઽથ સાયં
તે વેદશાસ્ત્રધનભોગસમૃદ્ધિગાસ્સ્યુઃ ॥ ૧૧૮॥

આનન્દદાયકશુકાક્ષરવન્મદીય-
માનન્દદાયકમિદં ભવતાદ્બુધેભ્યઃ ।
આનન્દરૂપપરમેશિતુરપ્યપૂર્વ-
માનન્દમેવ તનુતે ભુવિ યા તદીયમ્ ॥ ૧૧૯॥

આચાર્યશઙ્કરમહોજ્જ્વલસમ્પ્રદાયઃ
શ્રીનારસિંહગુરુપુણ્યકટાક્ષપૂતઃ ।
લીલાભિરેનમતનોત્સ મુદૈવ સચ્ચિ-
દાનન્દસંયમિવરસ્તવમમ્બિકાયાઃ ॥ ૧૨૦॥

પુણ્યશ્લોકઃ પરમપુરુષસ્સુન્દરેશો મહાત્મા
પુણ્યશ્લોકા ઝષકનયના પાર્વતી પાણ્ડ્યજા સા ।
પુણ્યશ્લોકાઃ મમ ચ દશકદ્વ્યુત્તરા યે શતાન્તાઃ
પુણ્યશ્લોકાઃ પઠનનિરતાઃ પાણ્ડ્યપુત્રીસ્તવસ્ય ॥ ૧૨૧॥

ઇતિ શ્રીસચ્ચિદાનન્દ-ભારતી સ્વામિભિઃ કૃતમ્ ।
મીનાક્ષીસ્તવરાજં યે પઠન્તિ નરસત્તમાઃ ॥

ત્રિદિવં તે તૃણીકૃત્ય કૈલાસે વાસમાપ્નુયુઃ ।
કુર્વન્તિ યેઽત્ર સન્દેહં નરકાર્હા ભવન્તિ તે ॥ ૧૨૨॥

॥ ઇતિ શ્રીસચ્ચિદાનન્દભારતીમહાસ્વામિભિઃ વિરચિતં
શ્રીમીનાક્ષીશતકં અથવા શ્રીમીનાક્ષીસ્તવરાજં સમ્પૂર્ણમ્ ॥

The referenced book in print had missing
syllables in verse lines 100.1 and 101.1.
The words નગઃ and કલા are added for
their metrical suitability and meaning.

Encoded by Aaditya Kalyanaraman
Proofread by Aaditya Kalyanaraman, Rajani Arjun Shankar

---

*Shri Minakshi Shatakam or Stavarajam*
pdf was typeset on August 2, 2025

Please send corrections to *sanskrit@cheerful.com*